# शब्दविमर्शः - रप्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थान्

## 1. नम्रः।

भ्रातृपुत्रदेवरादीनालेखयितुमशेषगुणाकरनिर्मथनोद्भावित इव वाल्मीकेः मनस्विनो लक्ष्मणस्य मूर्तिः मनस्स्वतिमुहूर्तमवतिष्ठते। दाशरथीत्वेन पुत्रत्वम् सुमित्रानन्दवर्द्धनस्य। श्रीरामादीनां सोदरः। विशिष्य रामस्य बहिश्चरः प्राणः। नहि तेन विना निद्रां लभते पुरुषोत्तम इति रामायणे। रामकैङ्कर्यलक्षणसम्पद्युक्तत्वाल्लक्ष्मण इति रामायणभूषणकारो गोविन्दराजः। सीताया भर्तृसोदत्वाद्देवरः।

लोकसङ्ग्रहाय धीराश्चादर्शवन्तो महात्मानो दर्शनीया इति खलु रामायणकर्तुर्लक्ष्यम्। येन लोकास्ताननुकुर्युः। आदर्शवन्त इति मन्महे। परं धीरा इति नावजानीमः। कुतो दोषः। दोष इति न ब्रूमः। सङ्ग्रामे खलु धीरता परीक्ष्यते। लोकसङ्ग्रहस्तावदाहवेन विनैव सिद्ध्यतीति बहुधा व्यासादयोऽदर्शयन्। मा स्म विमुह्यत्। सङ्ग्रामसम्मुखतामात्रं न धीरता नाम। कामक्रोधादिषु वैरिषु विकुर्वत्स्वपि यस्तद्वशी न भवति स धीरः। 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' (कुमा.1.59) इति कालिदासोक्तमवधेयम्। प्रायशो महापुरुषसंश्रया हि लोकाः। अमुमेव लक्ष्यं पुरस्कृत्य 'कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्। धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।।' (1.1.2) इति प्रश्नमुखेन रामायणस्य प्रारम्भः कृतः। 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।' (3.21) इति गीताकारोऽपि द्रढयन्निवैनमाशयम्।

वस्तुतो विवक्षितमन्यत्। किं तत्। रप्रत्ययान्तशब्दाः। तस्मिन् प्रसङ्गेऽयं महात्मा लक्ष्मणः स्मृतिपथमागतः। लक्ष्मणं लक्ष्मीवन्तमुपवर्णयतो विषयान्तरप्रवेशो मनागभूत्। कथमस्य रप्रत्ययेन सम्बन्धः। एतत्कथाकृतवाग्द्वारे रप्रत्ययं सन्दधानीति प्रत्याशिषम्। भट्टिकाव्येऽमुमेव लक्ष्मणं सराममुपवर्णयति।

'तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः। भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः।।' (भट्टिः.11.4) इति। पित्राज्ञाकरणोद्यतौ धनुष्मन्तौ तौ कुमारौ पितुश्चरणयोर्निपेततुः। प्रणतावित्यर्थः। भूपतेरपि बाष्पबिन्दवः प्रणतयोः प्रवासं करिष्यतोस्तयोरुपरि निपेततुः। निपेततुरित्यध्याह्रियते। रामलक्ष्मणयोः नैसर्गिकोऽयं संस्कारविशेषः। सम्प्रति प्रवत्स्यमानौ निश्शेषेण पादावस्पृशतामित्यर्थः। दशरथस्य पुत्रवात्सल्यातिरेकप्रयुक्तः

तद्विरहासहिष्णोः निश्शेषाश्रुपातः। कोऽत्र विशेषः। नम्रयोरित्यत्र विशेषः। 'तदगुणैः कर्णमागत्य चापलाय प्रचोदितः' (1.9) इति रघुवंशे कालिदासेनाप्युद्घोषिते तद्गुणातिशयो नाम न कश्चिदाश्चर्यो विषयः। नहि नम्रशब्दगतं तद्गुणं व्याहर्तुमुत्सहामहे। किञ्चातः। व्युत्पत्तिमात्रम्।

नम्रशब्दः णम प्रह्वत्वे शब्दे च (भ्वा.1006) इत्यस्माद्धातोः 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रप्रत्ययान्तः। नमतोरित्येवास्तु शीलस्तु तेषामस्त्येवेति चेन्न। रप्रत्ययस्तच्छीलभिन्नेऽप्यर्थे प्रयुज्यते यथा तद्धर्मे तत्साधुकारिणि च। तेन सम्यङ्नमतोरित्यर्थः। 'नते निम्नताप्राप्ते विनयान्विते च' इति शब्दार्थचिन्तामणिः। नम्रो नाम नत इति हलायुधः। नम्रशब्दोऽयं त्रिष्वपि लिङ्गेषु प्रयुज्यते। 'तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः। श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्याम् या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः।।' इति मेघसन्देशे (उत्तरमेघः.21)। स्तोकमल्पं नमितुं शीलमस्या इति स्तोकनम्रा। न कुत्राप्येवं विधं रमणीयं रमणीरत्नेष्वस्तीति मल्लिनाथोक्तवत्सर्वलक्षणसम्पन्नां कथानायिकामित्थमवर्णयत्कविः। रघोः बाल्यवर्ण नाप्रसङ्गे 'उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम्। अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः।।' इति रघुवंशे (3.25)। प्रणिपातस्य पूज्यपूजायाः शिक्षयोपदेशेन नमनशीलोऽभूदित्यर्थः। एवं पञ्चतन्त्रे 'यन्नम्रं सरलञ्चापि तच्चापत्सु न सीदति। धनुर्मित्रं कलत्रञ्च दुर्ल्लभं शुद्धवंशजम्।।' इति (2.182)। नम्रशब्दोऽत्रानौद्धत्येऽर्थे। पुॅल्लिङ्गाधिकारे 'रोपधः' इति लिङ्गानुशासनादुत्सर्गतो रोपधाः शब्दाः पुॅसि प्रयुज्यन्ते। एतदपवादेषु रप्रत्ययान्तोऽजस्रशब्दः क्लीबेषु पठितः। यस्य प्रपञ्चोऽग्रे पृथक्करिष्यते।

वयं तावदेनं प्रयोगं नोपरोत्स्यामः। किमतः। रप्रत्यय इत्युक्तम्। बहुष्वर्थेषु तस्य प्रयोग इति च। तद्विव्रियताम्। अवश्यं ब्रूमः। ततः पूर्वमुदाहरणान्तरं दर्शयिष्यामहे। भट्टिकाव्ये श्रीरामसम्भवो नाम प्रथमः सर्गः। तत्र यज्ञरक्षार्थं श्रीरामं याचमानो विश्वामित्र आजगाम। प्रतिश्रुत्य प्रत्यावर्तनेन ऋषिशापभयाद्दशरथो विमनास्तं विश्वामित्रेण सह प्रैषयत। तदुच्यते - 'आशीर्भिरभ्यर्च्य मुनिः क्षितीन्द्रं प्रीतः प्रतस्थे पुनराश्रमाय। तं पृष्ठतः प्रष्ठमियाय नम्रो हिंस्रेषु दीप्राप्तधनुः कुमारः।।' (1.24) रामगमनस्यानुज्ञातत्वात् प्रीतो मुनिः राजानमाशीर्भिरभ्यर्च्य पुनराश्रमाय प्रतस्थे। तत्प्रस्थानं विव्रियते प्रष्ठम् = अग्रयायिनं तं मुनिम्। पृष्ठतः = पश्चात् इयाय कुमारः। अग्रे गच्छन्तं मुनिं श्रीरामोऽन्वगादित्यर्थः। कथंविध इत्युक्तौ नम्रोऽनुकूलः। हिंस्रेषु दीप्राप्तधनुः = हिंसनशीला इषवः शराः हिंस्रेषवः। आप्तमविसंवादि यद्धनुस्तत्। हिंस्रेषु दीप्रं ज्वलनशीलमाप्तं धनुर्यस्य कुमारस्य। दीप्रमस्त्रं धृष्टतया यस्य

धनुषस्तद्दीप्रास्त्रं धनुर्यस्येति वाऽसौ। कस्मिन्विषये। हिंस्रेषु नान्येषु। राजानमाशीर्भिरभ्यर्च्य रामलक्ष्मणानुगतो मुनिः पुनराश्रमाय प्रातिष्ठतेति भावः। अत्रोक्ताः नम्रादयः शब्दाः प्राग्वत् 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रप्रत्ययान्ताः।

सुविदितापि ईषद्रामायणकथा प्रस्तूयते येन रप्रत्ययसम्बन्धिषु विषयेष्वनायासः प्रवेशो लभ्येत। विश्वामित्रमासन्नं पूजयता दशरथेन 'मम चायमनुप्राप्तो महानभ्युदयो द्विज। तवागमनजः कृत्स्नो धर्मश्चानुत्तमो द्विज।।' इत्यभाणि। तत आसीनो महर्षिस्तस्य यज्ञविघ्नकरयोः मारीचसुबाह्वोः निग्रहार्थं रामं ययाचे येन राज्ञो धर्मलाभः परमञ्च यशः भविष्यति। एतच्छ्रुत्वा नितरां विषण्णो नृपतिः श्रीरामस्य प्रेषणे वैमुख्यञ्च प्राकटयत्। तेन विश्वामित्रो रोषपरीतः 'राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः। यदीदं ते क्षमं राजन् गमिष्यामि यथागतम्। मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सुहृद्वृत' इत्युक्त्वा गन्तुमुपाक्रमत। विश्वामित्रे रोषपरीते वसिष्ठः 'तव पुत्रहितार्थाय त्वामुपेत्याभियाचते' इति राजानमब्रवीत्। 'तथा वसिष्ठे ब्रुवति राजा दशरथः स्वयम्। प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम्।। ततः 'ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना।' पूर्वं विश्वामित्रेण 'अहं वेद्मि महात्मानं रामं सत्यपराक्रमम्। वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः।' इत्युक्तमिह स्मर्तव्यम्। 'मुनिः लब्धमनोरथः। राजापि पुत्राभिवृद्धिश्रवणेन तुष्टः।' इति रामायणांशः। एतेन विरोधो दृश्यते भट्टिकाव्ये। तत्र त्वस्मिन् प्रसङ्गे 'कृच्छ्रेण ददा'विति प्रसङ्गोऽनुस्मरणीयः। यद्यपि तत्परिरक्षाविषये गतसन्देहस्तथापि पुत्रवियोगेन दूयमानमनोवृत्तिरभूदेवेत्यर्थोऽत्र कवेः।

रप्रत्ययान्तशब्दः प्रयुक्तोऽन्यत्र भट्टिकाव्ये सीतान्वेषणवर्णनप्रसङ्गे सप्तमे सर्गे। सीतान्वेषणं प्रतिश्रुत्य अतीतेऽपि काले तदर्थं सन्नाहमनुपलभमानो रामः लक्ष्मणं प्रेषयामास सुग्रीवस्यान्तिकम्।

'तं जागरूकः कार्येषु दन्दशूकरिपुं कपिः। अकम्प्रं मारुतिर्दीप्रं नम्रः प्रावेशयद् गुहाम्।।' (7.23) तं लक्ष्मणं कपिर्मारुतिः गुहां प्रावेशयत्। कीदृशं लक्ष्मणमिति वर्णयति - कार्येषु कृत्येषु जागरूकम्। दन्दशूकरिपुं हिंस्रारिम्। दीप्रं साधु दीप्यमानम्। अकम्प्रम् अकम्पनशीलमभीरुमित्यर्थः। नम्रं साधु प्रह्वीभूतमित्यादि। सर्वत्र 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रः।। अत्रापि सन्दर्भे भट्टिकाव्यस्य रामायणेन सह भेदो दृश्यते। यथा रामायणे तावद्धनूमता प्रबोधितः सुग्रीव आदौ वानरान् सर्वानानयति। ततः परमेव लक्ष्मणस्य प्रवेशः। विरहातुरं राममवेक्ष्य क्रुद्धो लक्ष्मणः वालिनं हन्तुमेव प्रातिष्ठत। परं रामेणानुनीतः

अतिक्रान्तवेलानिवेदनाय सुग्रीवम्। यस्मिँश्च दिने लक्ष्मणस्सम्प्राप्तस्तमेव दिनं सीतान्वेषणाय प्रतिष्ठासूनां वानराणां सैन्यस्य आयोजनाय सुग्रीवेणापि कल्पितम्। भट्टिकाव्ये त्वादौ प्रमाद्यन्तं सुग्रीवं लक्ष्मणः शशास। तदनु सुग्रीवश्चिरं सुदुःखशयितः सुखं सम्प्राप्य प्राप्तकालमविज्ञाय स्थित इति स्वीयं प्रमादमवगम्य क्षमां याचते। ततो वानरान्प्रेषयति नानादिक्षु सीतान्वेषणाय।

भूयोऽपि भट्टिकाव्ये 'विभीषणोक्तं बहु मन्यमानः प्रोन्नम्य देहं परिणामनम्रम्। स्खलद्वलिर्वार्धककम्प्रमूर्धा मातामहो रावणमित्युवाच।।' (12.55) विभीषणवचो बहु मन्यमानः श्लाघमानो मातामहो माल्यवान् वयसः परिणामान्नमनशीलं देहं प्रोन्नम्योक्षिप्य। अत एव स्खलद्वलिः। वार्धकेन वृद्धभावेन कम्प्रः कम्पनशीलो मूर्धा यस्यासौ। रावणमिति = वक्ष्यमाणप्रकारमुवाचेति भावः। ननु रावणमित्युवाचेत्यत्रेतिशब्दस्य कथङ्कारं वक्ष्यमाणमिति तात्पर्यमुच्यते समाप्तौ खल्वितिशब्दः प्रयुज्यते इति चेन्न सन्दिह्यतामितिशब्दस्य 'हेतुप्रकरणप्रकाशादिसमाप्तिषु' प्रयोगात्। ननु काव्यानुदाहरन् भवान् भूयसा भट्टिकाव्यमुद्धरति। व्याकरणं खलु चर्चाविषयः। रप्रत्ययान्तशब्दाः। तत्र स्पष्टप्रतिपत्तये लाघवेन सरसा तरसावगमाय च खलु काव्यानुदाहरति। अयञ्च पुनर्महाकविरुदघोषीत् 'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्। हस्तामर्ष इवान्धानां भवेद्व्याकरणादृते' इति। पारस्परिकोऽयं विरोधः। एतत् खलु श्रूयते यद् व्याकरणमध्यापिपयिषता काव्यमरचीति। ननु को वा दोषः। कथं काव्याध्ययनेन व्याकरणबोधो जायेताव्युत्पन्नमतीनामस्मदादीनामिति। मैवम्। व्याकरणमध्यापिपयिषतेति खलूक्तं प्राक्। अध्यापनन्नाम प्रवचनलभ्यं यत्राचार्यः पूर्वरूपमन्तेवास्युत्तररूपम्। परिहृतमेतत्। परमयमपरोऽप्याक्षेपः यस्त्वपरिहृत एव। कोऽयमाक्षेपः। सरसतादीनां बहूनां सहृदयहृदयावर्जकानां ललितगुणानामभावेन व्याकरणजटिलं अमनोहारि चेदं काव्यमिति येन कालिदासादीनामिवैतत्काव्यं न सेवन्ते बहवः। यथोक्तं विश्वगुणादर्शचम्पूकारेण कृशानुमुखेन। 'सूत्रैः पाणिनिकीर्तितैर्निष्पाद्य शब्दावलिं वैकुण्ठस्तवमक्षमा रचयितुं मिथ्याश्रमाः शाब्दिकाः। इत्यादि (570)। अये ग्रन्थस्यैव नाम्नि गुणशब्दोऽयमगौणः प्राथम्यं भजते। गुणॉस्तावदाचक्ष्महे। कृशानवस्तु पुनः प्रचुरमुपलभ्यन्ते दोषैकमात्रदृशः। अथवा पुनरस्तु कृशानवोऽपि गुणदर्शिन एव भङ्ग्यन्तरेण। यथा तस्मिन् दोषे आरोपिते खलु गुणानुकीर्तनारम्भः। कथमिव। यथा 'कथं सखे ! शतकोटिपाणिनिगदितादपि पाणिनिगदितमेव व्याकरणमाद्रियन्ते सन्तः' इति। तथा चायमुपकर्ता नापकर्ता। कोऽयं शतकोटिपाणिनिः। शतकोटिर्नाम वज्रम्। तत्पाणौ यस्य तेनेन्द्रणेत्यर्थः। अस्तु तर्ह्यनेन भवानेतत्काव्यगुणानुगायक इव। एवमेव। यथा 'न तज्जलं यन्न सुचारुपङ्कजम्।

न पङ्कजं तद्यदलीनषट्पदम्। न षट्पदोऽसौ न जुगुञ्ज यः कलम्। न गुञ्जितं तन्न जहार यन्मनः।।’ इति भट्टिः (2.19)। ओमित्यङ्गीकुर्मः। तत्तावदास्ताम्। रप्रत्ययविषये समग्रमुच्यताम्। श्रूयतामग्रे। ***